दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-284
1
06.08.2024 मंगलवासरः वि.सं. २०८० श्रावणशुक्ल द्वितीया श्रावण 22 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## बांग्लादेशे छात्र- विरोधप्रदर्शनस्य मध्ये प्रधानमन्त्री शेखहसीना त्यागपत्रं दत्त्वा सैन्यचक्रयानेन देशं त्यक्तवती

**हिमसंस्कृतवार्ताः।** छात्र-विरोधप्रदर्शनस्य मध्ये बांग्लादेशीय प्रधानमन्त्री शेखहसीना देशस्य प्रधानमन्त्रीपदात् त्यागपत्रं दत्त्वा सैन्यहेलिकॉप्टर-यानेन देशं त्यक्तवती। सेनाप्रमुखः जनरल वाकर-उज-जमानः देशस्य संचालनाय अन्तरिमसर्वकारस्य निर्माणं भविष्यति इति घोषितवान्। बाङ्गलादेशस्य वार्तामाध्यमेषु उक्तं यत् ढाका-नगरे प्रधानमन्त्रिणः आधिकारिकनिवासस्थाने शतशः आन्दोलनकारिणः आक्रमणं कृतवन्तः। अथ प्रधानमन्त्री हसीना "सुरक्षितस्थानं" प्रति प्रस्थितवती।



दूरदर्शने राष्ट्र सम्बोधयन् बाङ्गलादेशस्य सेनाप्रमुखः जनरल वाकर- उज- जमानः देशवासिनां फूते धैर्यं धारयितुं शान्तिं च स्थापयितुम् आग्रहं कृतवान्। रविवासरे आरक्षिणाम् अथ आन्दोलनकारिणां मध्ये संजातसंघर्षे प्रायः शतजनाः मृताः, सहस्राधिकाः च वृणिताः अभवन्।

## पञ्चाशत् लक्षाधिकाः श्रमिकाः प्रधानमन्त्री- श्रमयोगी- मान- धनयोजनायाः कृते पञ्जीकरणं कृतवन्तः- श्रम-उद्योग-मन्त्रालयः




श्रम-उद्योग-मन्त्रालयेन सूचितं यत् गतमासस्य अन्ते यावत् असंघटितक्षेत्रे पञ्चाशत् लक्षाधिकाः श्रमिकाः प्रधानमन्त्री- श्रमयोगी- मान- धनयोजनायाः कृते पञ्जीकरणं कृतवन्तः। योजना अष्टादशतः चत्वारिंशत् वर्षाणां आयुवर्गस्य असंघटितक्षेत्रस्य कार्यकर्तृभ्यः वृद्धावस्थासुरक्षां प्रददाति। नवदशोत्तर-द्विसहस्रतम-वर्षस्य फरवरीमासे अस्य प्रारम्भः अभवत्। श्रम- रोजगारराज्यमन्त्री शोभा करन्दलाजे लिखितरूपेण उत्तरे उक्तवती यत् हरियाणादेशे अधिकतमं श्रमिकाणां पञ्जीकरणं कृतम्।

## सुभाषितम्

**यदा न कुरुते भावं**
**सर्वभूतेष्वमंगलम्।**
**समदृष्टेस्तदा पुंसः**
**सर्वाः सुखमयाः दिशः॥**

**भावार्थः-** मनुष्य किसी भी जीव के प्रति अमंगल भावना नहीं रखता, जो मनुष्य सभी की ओर सम्यक् दृष्टि से देखता है, ऐसे मनुष्य को सब ओर सुख ही सुख है।

*प्रतीकसाळ्वे मुम्बई*

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## राष्ट्रपतिः द्रौपदी मुर्मूः द्विदिवसीय- आधिकारिकयात्रायाः कृते फिजीदेशं प्राप्तवती

**हिमसंस्कृतवार्ताः।** राष्ट्रपतिः द्रौपदी मुर्मूः द्विदिवसीय- आधिकारिकयात्रायाः कृते फिजीदेशं प्राप्तवती। अवधेयमस्त यत् अद्यावधि भारतस्य राष्ट्रपतेः फिजीदेशस्य इयं प्रथमा यात्रा वर्तते। फिजीदेशस्य उपप्रधानमन्त्री विलियम गवोका तथा फिजीदेशस्य भारतीय उच्चायुक्तः पी.एस. कार्तिगेयन च राष्ट्रपतेः भव्यं स्वागतं कृतवन्तौ। राष्ट्रपतिः द्रौपदी मुर्मू अगस्तमासस्य षट्-सप्तम-दिनाङ्केषु सुवा-नाडी-नगरयोः आधिकारिकसङ्गतिषु भागं ग्रहीष्यति। राष्ट्रपतिः मुर्मू फिजीदेशस्य राष्ट्रपतिना विलियम- कटोनिवेरे इत्यमुना तथा प्रधानमन्त्रिणा सिटिवेनी रबुका इत्यमुना च सह द्विपक्षीयसमागमं करिष्यति।



राष्ट्रपतिः फिजी-संसदमपि सम्बोधयिष्यति। सा सुवानगरस्य गान्धीस्मारकमहाविद्यालयस्य, नादीनगरस्य श्रीशिवसुब्रमण्य-स्वामीमन्दिरस्य च दर्शनं करिष्यति। अस्याः यात्रायाः उद्देश्यम् अस्ति यत् द्वीपराष्ट्रेण सह अस्माकम् ऐतिहासिक- सम्बन्धस्य सुदृढीकरणम्।

## स्वास्थ्यक्षेत्रे सर्वकारेण सर्वाधिका प्राथमिकता दत्ता- स्वास्थ्य-मन्त्री



केन्द्रीय- स्वास्थ्य- परिवार-कल्याणमन्त्रिणा जगतप्रकाशनड्डावर्येण उक्तं यत् मोदीसर्वकारेण स्वास्थ्यक्षेत्रे सर्वाधिक प्राथमिकता दत्ता। लोकसभायां ऐषमः वर्षस्य स्वास्थ्य-परिवार- कल्याण-मन्त्रालयस्य नियन्त्रणाधीनस्य अनुदानस्य क्रियान्वयनस्य विषये चर्चायाः उत्तरं यच्छन् केन्द्रीयमन्त्री सूचितवान् यत् स्वास्थ्यक्षेत्रे त्रयोदश-चतुर्दशोत्तर-द्विसहस्रतमे वर्षे वित्त-विनियोगः अष्टसप्तत्यधिक-द्विशतोत्तर-त्रयस्त्रिंशत् सहस्रं कोटिरूप्यकाणि आसन् तदनु प्रक्कुर्त वर्धित्वा अष्टपञ्चाशदधिक-नवशतोत्तर- नवति- सहस्र- कोटि-रुप्यकाणि अभवन्। अनेन सह तुलनायाम्, स्वास्थ्यक्षेत्रे वित्तविनियोगे चतुष्षष्टि-अधिक-एकशतं प्रतिशतं वृद्धिः पञ्जीकृता।

## जम्मू-कश्मीरस्य तथा लद्दाखस्य च जनानां कृते कार्यं कुर्वन् आगामी काले तेषां आकांक्षाः अपि पूरयिष्यति सर्वकारः- प्रधानमन्त्री

**हिमसंस्कृतवार्ताः, नवदेहली।** प्रधानमन्त्रीनरेन्द्रमोदी उक्तवान् यत् तदीयसर्वकारः जम्मू-कश्मीरस्य तथा लद्दाखस्य च जनानां कृते कार्यं कुर्वन् आगामी काले तेषां आकांक्षाः अपि पूरयिष्यति। सामाजिक- सञ्जालीय-माध्यमेन श्रीमोदिना भणितं यत् गतवर्षे अगस्तमासस्य पञ्चमे दिनाङ्के संसत्-सदनेन सप्तत्यधिकत्रिशतम्, पञ्चत्रिंशत् 'अ' इति अनुच्छेदद्वयोः च निरसनस्य निर्णयः कृतः, यत् राष्ट्रस्य इतिहासे अविस्मरणीय क्षणम् आसीत्। सः अवदत्, जम्मू-कश्मीरे, लद्दाखे च प्रगतेः समृद्धेः च नूतनयुगस्य आरम्भः आसीत् । प्रधानमन्त्रिणा उक्तं यत्, एतेषु स्थानेषु भारतस्य संविधानम्, अक्षरशः, संविधाननिर्मातृणां महापुरुषाणां महिलानां च दृष्टेः अनुरूपं कार्यान्वितम् अभवत्। सः अवदत् यत्, अनेन सह महिलानम्, युवानाम्, परिशिष्टवर्गाणाम्, आदिवासीसमुदायानां कृते सुरक्षा, गौरवः, अवसराश्च प्राप्ताः ये च विकासस्य फलात् बंचिताः आसन्। सः अवदत् यत्, सहैव दशकैः जम्मू-कश्मीरे आवृतं भ्रष्टाचारं स्थगितम् अपि अभवत्। अन्यत्र, भारतस्य इलेक्ट्रॉनिक्स् निर्यातः अधुना देशस्य शीर्षत्रिषु नियतिषु अन्यतमः अभवत् इति प्रधानमन्त्री नरेन्द्रमोदी आनन्दं प्रकटितवान्। विद्युदीय-तथा भारतीय-प्रौद्योगिकी- मन्त्रिणः अश्विनीवैष्णवस्य सामाजिक सञ्जालीयसन्देशम् उद्धृत्य असौ अवदत् यत् इलेक्ट्रॉनिक्सक्षेत्रे भारतस्य पराक्रमः देशस्य अभिनव-युवाशक्त्या चालितः अस्ति। सः अवदत्, भारतदेशः आगामिषु कालेषु निरन्तररूपेण एतां गतिं सुस्थापयितुं प्रतिबद्धः अस्ति।

## हिमाचलप्रदेशे, उत्तराखण्डे च अग्रिमदिनद्वयं यावत् अतिवृष्टिः-ऋतु-विभागः

भारतीय-ऋतु-विज्ञान-विभागेन अनुमानितं यत् पश्चिम-राजस्थाने अतोऽपि अतिवृष्टिः, गुजरात-महाराष्ट्रयोः अतिवृष्टिः च भविष्यति। जम्मूकश्मीरे, उत्तरप्रदेशे, हरियाणाराज्ये, पंजाबे, तमिळ्नाडुराज्ये च अतिवृष्टेः सम्भावना वर्तते। विभागेन इदमपि सूचितं यत् उत्तर- पश्चिमभारते, पूर्वभारते चापि आगामी त्रिचतुर्दिनेषु अतिवृष्टिः भविता। विभागेन उक्तम्, हिमाचलप्रदेशे, उत्तराखण्डे च अग्रिमदिनद्वयं यावत् अतिवृष्टिः भविष्यति।

## केन्द्रसर्वकारेण कर्णाटकस्य आदिचुनचनगिरी, केरलस्य चूलान्नूरजनपदं च मयूर- अभयारण्यरूपेण घोषितम्- केन्द्रीयपर्यावरण-वनमन्त्री

**हिमसंस्कृतवार्ताः, नवदेहली**

केन्द्रीयपर्यावरण-वन-जलवायु परिवर्तनमन्त्री भूपेन्दरयादवः उक्तवान् यत् केन्द्रसर्वकारेण कर्णाटकस्य आदिचुनचनगिरी, केरलस्य चूलान्नूरजनपदं च मयूर- अभयारण्यरूपेण घोषितम्। दिल्लीनगरे मयूरस्य मृत्योः विषये प्रश्नस्य उत्तरे सः लोकसभां सूचितवान् यत् मयूराः तापघातेन मृताः न तु एवियन इन्फ्लूएन्जा इत्यनेन रोगेण। मन्त्री उक्तवान् यत्, राष्ट्रियपक्षिणः संरक्षणार्थं अनेके उपायाः क्रियन्ते तथा च मन्त्रालयेन मयूराणां प्रजनन-संरक्षणकेन्द्राणि अपि स्थापितानि सन्ति।

# अन्ताराष्ट्रीयः मिञ्जरमेलापकः : चम्बा राज्यस्य प्रथमं हरितहाइड्रोजन आधारितं गतिशीलतास्थानकं प्राप्स्यति- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः

**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सोमवासरे शिमलातः आभासीयमाध्यमेन अन्ताराष्ट्रीय-मिञ्जरमेला- समापनसमारोहस्य अध्यक्षतां कृतवान्। अस्मिन् अवसरे सः १२०.४४ कोटिरूप्यकाणां विविधविकासपरियोजनानाम् उद्घाटनं, आधारशिलाः च अस्थापयत्। अस्मिन् अवसरे विधानसभाध्यक्षः कुलदीपसिंह पठानिया अपि मुख्यमन्त्रिणा सह आसीत्। मुख्यमन्त्री प्रतिकूलवातावरणस्य कारणात् मिञ्जरमेलासमापनसमारोहे उपस्थातुं न शक्तवान् इति उक्तवान्। मेलापकस्य सफलतया आयोजनार्थं जनानां, मण्डलप्रशासनस्य च प्रयत्नस्य प्रशंसाम् अकरोत्। प्रायः १४ कोटिरूप्यकाणां व्ययेन निर्माणाधीनस्य चम्बानगरे हरितहाइड्रोजन आधारितं गतिशीलतास्थानकस्य (ग्रीन-हाइड्रोजन- मोबिलिटी स्टेशन) प्रायोगिक-परियोजनायाः आधारशिला स्थापयित्वा मुख्यमन्त्री उक्तवान् यत् चम्बा हिमाचलप्रदेशस्य प्रथमं मण्डलं भवितुम् अर्हति यत् एतादृशी परियोजना प्राप्नोति।





एषा महत्त्वपूर्णा हरितपरिकल्पना वर्तमानराज्यसर्वकारस्य नेतृत्वे राष्ट्रियजलविद्युत्निगमेन (NHPC) निर्मितं भविष्यति, अगस्त २०२५ यावत् च सम्पन्नं भविष्यति। मुख्यमन्त्री उक्तवान् यत् एषा परियोजना एनएचपीसी-संस्थायाः चमेरा- ३- विद्युत्केन्द्रस्य समीपे स्थास्यति, ऊर्जा- आवश्यकतानां पूर्तये ३०० किलोवाट-भारस्य ग्रिडसम्बद्धं सौरविद्युत्संस्थानं च अन्तर्भवति। संयंत्रे प्रतिदिनं २० किलोग्रामं हरितहाइड्रोजनस्य उत्पादनं भविष्यति, यत् हरितहाइड्रोजनबसयानस्य ईंधनार्थं ४५० बारं अथवा अधिकप्रभावे संगृहीतं भविष्यति। एतदतिरिक्तं बसयानानां ईंधनपूरणस्य सुविधायै हाइड्रोजनवितरक-युनिट अपि स्थापिता भविष्यति। सः अवदत् यत् एषा अपूर्वपरियोजना क्षेत्रे प्रथमवारं हरितहाइड्रोजनबसयानानां प्रवर्तनं करिष्यति, यस्य उद्देश्यं भारतस्य दूरस्थेषु क्षेत्रेषु हरित- हाइड्रोजनविषये जागरूकतां वर्धयितुं वर्तते। मुख्यमन्त्री उक्तवान् यत् एनएचपीसी इत्यनेन चम्बा-जनपदस्य हरित- हाइड्रोजन- बस- क्रयणस्य निविदाप्रक्रिया आरब्धा एव, यत् प्रायोगिकपरियोजनायाः कार्यानुष्ठानानन्तरं तस्य उपलब्धता सुनिश्चिता भवति। चम्बामण्डले अस्याः परियोजनायाः आरम्भेण राजस्वं वर्धते, रोजगारस्य अवसराः च सृज्यन्ते, येन क्षेत्रस्य आर्थिकविकासे योगदानं भविष्यति इति अपेक्षा अस्ति। वर्तमानराज्यसर्वकारस्य लक्ष्यं हिमाचलप्रदेशं ३१ मार्च २०२६ पर्यन्तं हरित ऊर्जाराज्ये परिणतुं वर्तते, यत्र याचनापूर्तये हरित ऊर्जायाः सदुपयोगं कर्तुं केन्द्रितम् अस्ति। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः अपि अस्याः दृष्टेः अनुरूपं हरित-उद्योगस्य प्रचारं कुर्वन् अस्ति। अस्याः उल्लेखनीयायाः हरितहाइड्रोजन- परियोजनायाः अतिरिक्तं मुख्यमंत्री सुक्खुः अन्येषां विविधानां विकासपरियोजनानां उद्घाटनम्, आधारशिलाः च अकरोत्। सः ३५.३८ कोटिरूप्यकाणां व्ययेन निर्माणाधीनस्य चम्बानगरे लघुसचिवालयस्य भवनस्य, ११.१२ कोटिरूप्यकाणां व्ययेन निर्माणाधीनस्य पुलिसग्राउण्ड चम्बा इत्यत्र इण्डोर- क्रीडाङ्गणस्य च शिलान्यासं कृतवान्। ५ कोटिरूप्यकाणां व्ययेन निर्माणाधीनस्य चम्बानगरे पार्किङ्ग-सह-वाणिज्यिकसङ्कुलस्य निर्माणकार्यमपि प्रारब्धवान्, चम्बापार्किङ्गस्य निर्माणं १८ मासाभ्यन्तरे सम्पन्नं भविष्यति इति च अवदत्। सरुक्षेत्रस्य जिला- शैक्षिकप्रशिक्षणसंस्थानस्य (DIET) बहु-उद्देश्यभवनस्य पुस्तकालयस्य च शिलान्यासः कृतः यस्य निर्माणं ४.६४ कोटिरूप्यकाणां व्ययेन भविष्यति। मुख्यमन्त्री पं. जवाहरलालनेहरू मेडिकल कॉलेज एण्ड हॉस्पिटल (JLNMC&H), चम्बा इत्यत्र नवनिर्मितस्य ट्रॉमा केयर केन्द्रस्य अपि उद्घाटनं कृतवान् यस्य व्ययः १०.३८ कोटिरूप्यकाणां अभवत्। अस्मिन् एव चिकित्सालये विद्युत् उपकेन्द्रस्य अपि उद्घाटनं कृतम्, यस्य व्ययः २०.५८ कोटिरूप्यकाणां वर्तते। एतदतिरिक्तं ११.५७ कोटिरूप्यकाणां व्ययेन राजकीय-उपाधिमहाविद्यालय चम्बा इत्यत्र निर्मितस्य पीजी-खण्डस्य, तीसा- क्षेत्रस्यस्य भगीगढे १.६८ कोटिरूप्यकाणां व्ययेन निर्मितस्य प्राथमिकस्वास्थ्यकेन्द्रस्य (पीएचसी) च भंजरारु (तीसा) इत्यत्र ६.११ कोटिरूप्यकाणां व्ययेन निर्मितस्य नूतनस्य बसस्थानकस्य च उद्घाटनं कृतवान्। सः अवदत् यत् चम्बा हेलीपोर्टस्य शिलान्यासः शीघ्रमेव भविष्यति तथा च क्षेत्रे विमानयानानां कृते अनुदानं प्रदत्तं भविष्यति तदतिरिक्तं चम्बा-चुवाड़ी-जोत कन्दरायाः निर्माणार्थं परामर्शदातृसेवानां कृते ४ कोटिरूप्यकाणि विनियोजितानि सन्ति। सुक्खुः चम्बामण्डलस्य सर्वाः विकासात्मकाः आवश्यकताः चरणबद्धरूपेण पूरयितुम् आश्वासनं दत्तवान्। सः अवदत् यत् चम्बा चिकित्सा-महाविद्यालयाय १६५ कोटिरूप्यकाणि विनियोजितानि सन्ति, तस्य भवनस्य निर्माणं शीघ्रमेव सम्पन्नं भविष्यति। वैद्यस्य, पैरामेडिकलकर्मचारिणां च सर्वाणि पदानि पूरयिष्यन्ते।

## जोबरङ्गग्रामस्य फाण्डीनालिकायां जलप्रलयः, अनेकेषु भागेषु पञ्चदिनानि यावत् प्रचण्डवृष्टेः पीत- नारङ्गवर्णीया सचेतना



**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**
हिमाचलप्रदेशस्य लाहौल उपत्यकायाः जोबरङ्गग्रामस्य उपरि फाण्डीनालिकायां पर्वतात् रात्रौ आकस्मिकजलप्रलयेन आतङ्कः उत्पन्नः। परन्तु जलप्रलयेन अद्यापि कोऽपि क्षतिः न ज्ञातः। नालिका ग्रामं प्रति गच्छति इति कारणेन ग्रामजनाः चिन्तिताः सन्ति। २४ गृहाणां जनसंख्यायुक्तस्य जोबरङ्ग-ग्रामस्य जनाः वदन्ति यत् अधुना सुरक्षार्थम् अत्र तन्त्रीभित्तिः (क्रेटवाल) स्थापनम् आवश्यकम् अभवत्। अन्यथा वर्षायां नालिकायां जलप्लावनस्य नित्यं भयेन ग्रामजनाः जीवितुं बाध्यन्ते। जोबरंगपंचायतस्य पूर्वप्रमुखः सोमदेवः अवदत् यत् रात्रौ प्रायः १०:०० वादने स्वग्रामस्य उपरि फाण्डीनालिकायां जलप्रलयस्य कारणेन भयस्य वातावरणं वर्तते। ग्रामजनाः मशालैः सह वर्षाणां मध्ये स्वगृहात् बहिः सुरक्षितस्थानं प्रति गतवन्तः। प्रशासनाय अपि घटनायाः विषये सूचितम्। ऋतुविज्ञानविभागस्य अनुसारं राज्यस्य केषुचित् स्थानेषु ९ अगस्तपर्यन्तं प्रचण्डवृष्टेः सचेतना वर्तते। प्रदेशे ११ अगस्तपर्यन्तं प्रतिकूलवातावरणस्य संभावना अस्ति। विभागस्य अनुसारं अगस्त ७ दिनांके ऊनायाः, कांगड़ायाः व सिरमौरजनपदस्य च केषुचित् स्थानेषु प्रचण्डवृष्टेः नारङ्गवर्णीयसचेतना प्रसारिता अस्ति।

### आपदा- प्रबन्धन- प्राधिकरणेन परामर्शनिर्देशिका प्रसारिता

ऋतुविभागस्य सचेतनां दृष्ट्वा राज्यस्य आपदाप्रबन्धनप्राधिकरणेन परामर्शपत्रं प्रसारितम्। प्राधिकरणस्य अनुसारं वर्षा, हिमस्खलनं, भूस्खलनं च प्रवणक्षेत्रेषु उपरितनपर्वतीयक्षेत्रेषु गमनं परिहर्तव्यम्। प्रतिकूले वातावरणे पदयात्रा, उच्चोच्चक्षेत्रेषु गमनम् अपि भयङ्करं भवितुम् अर्हति। विद्युत्प्रकोपस्य सति गृहेषु अथवा सुरक्षितभवनेषु न्यूनातिन्यूनं ३० निमेषान् यावत् तिष्ठेत्। नद्यः, धारासु च न गच्छन्तु, यतः वर्षाकाले जलस्तरस्य आकस्मिकवृद्धेः संकटः भवति। नदीसमीपे निवसन्तः जनाः अधिकं सावधानाः भवेयुः। ऋतुविभागेन निर्गतानां सचेतनां विषये ध्यानं दत्त्वा रेडियो/दूरदर्शने प्रसारितानि ऋतुवार्ताः शृणुत। ग्रामपंचायत प्रधानः, उपप्रधानः, सार्वजनिकाः संस्थाः, पदयात्रिभिः चानुरोधः वर्तते यत् ते एतद् सन्देशं अधिकाधिकं प्रसारयन्तु। कस्यापि आपत्कालस्य सन्दर्भे राज्य- आपदा- प्रबन्धन- प्राधिकरणस्य दूरभाषसङ्ख्यासु सूचयन्तु।

### बङ्गाणायाम् अत्यधिकवृष्ट्या नद्यः नालिकाः च प्रवाहिताः, क्षेत्रेषु मक्काधान्यं विकीर्णम्

सोमवासरे प्रातःकाले उपमण्डलबङ्गाणाक्षेत्रे प्रचण्डवृष्ट्या लघुनालिकासु जलस्य प्रबलप्रवाहः दृष्टः। तस्मिन् एव काले मक्का- चरी- बाजरा- तिलहन- इत्यादीनि अन्यसस्यानि अपि केषुचित् स्थानेषु अस्याः वर्षायाः कारणेन क्षतिं प्राप्नुवन्। खरयालता, डीहर व धनेत पंचायतस्य केषुचित् ग्रामेषु अत्यधिकवृष्ट्या मक्कासस्यं क्षेत्रेषु पतितम्। केषुचित् स्थानेषु वर्षाजलेन सस्यक्षेत्रेषु तडागाः निर्मिताः। सोमवासरे प्रातःकाले वर्षाकारणात् लुणखर-उपनदस्य जलस्तरः सहसा वर्धितः। प्रशासनेन मातापितृभ्यः अनुरोधः कृतः यत् ते स्वसन्ततिं नद्यः, धाराः, उपनद्याः च समीपं न गन्तुं दद्युः।

### ब्यासनदीतीरे न गच्छन्तु, लारजी- जलबन्धात् १०० क्यूमेक्स- अतिरिक्तजलं मुक्तं भविष्यति

उपमण्डलाधिकारी (एसडीएम) मण्डी ओमकान्तठाकुरेण उक्तं यत् ब्यास नद्यां पङ्कस्य परिमाणस्य वर्धनेन लारजीविद्युत्गृहस्य यन्त्राणि स्थगितानि सन्ति। अस्य कारणात् जलबन्धप्रबन्धनेन लारजीजलबन्धात् प्रायः १०० क्यूमेक अतिरिक्तजलं मुक्तं भविष्यति। आवश्यकता चेत् पश्चात् अतिरिक्तं जलं नद्यां मोक्तुं शक्यते। जलस्य विमोचनेन ब्यास-नद्याः निम्नक्षेत्रेषु जलस्तरः वर्धते। सः ब्यास-नद्याः अधः क्षेत्रेषु निवसतां जनान् जीवन-सम्पत्त्याः सुरक्षायै नदीतीरे न गच्छन्तु इति उपदेशं दत्तवान्। सः अवदत् यत् जनान् ब्यास-नद्याः तटे न गच्छन्तु इति चेतयितुं हूटर-वादकाः फूत्कृताः सन्ति तथा च सार्वजनिक- सम्बोधन-व्यवस्थायाः माध्यमेन विभिन्नेषु स्थानेषु घोषणाः क्रियन्ते।

# हिमाचले प्रचण्डवृष्ट्या जलप्रलयेन च १४४ जनाः मृताः, ६५५ कोटिरूप्यकाणां हानिः



**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।** हिमाचलप्रदेशे तप्तग्रीष्मकालस्य अनन्तरं मानसूनस्य आगमनं आनन्दस्य, आश्रयस्य च समयः भवति। शीतलवृष्टिः हरितिमां, स्फूर्तिदायकं वातावरणं च आनयति परन्तु कदाचित् प्रकृतेः आशीर्वादः अभिशापरूपेण परिणतुं शक्नोति। गतस्य जुलाई-मासस्य ३१ दिनाङ्के रात्रौ यदा जनाः स्वगृहेषु शान्तिपूर्वकं सुप्तवन्तः तदा अस्मिन् प्रदेशे सहसा प्रचण्डवृष्टिः अभवत् यत् शान्त-मानसून-रात्रौ भवितुम् अर्हति स्म, तत् दुःस्वप्नम् अभवत् यतः पञ्चसु भिन्नस्थानेषु मेघ-विस्फोटाः अभवन् येन विनाशकारी-वृष्टिः अभवत् तत्र जलप्लावनम् अभवत्। अस्मिन् जलप्रलये बहूनि गृहाणि प्रक्षालितानि, परिवाराः विकीर्णाः, ५३ जनाः अदृश्याः च अभवन्। उद्धारदलानि अथकं कार्यं कुर्वन्ति, एतावता केचन् शवाः प्राप्ताः। शेषाणां लुप्तानां परिवाराः अद्यापि आशायां स्थिताः, मलिनावशेषाणां, पाषाणानां च राशीन् अन्विष्यन्ति, चमत्कारं प्रार्थयन्ति किन्तु सा आशा प्रत्येकं क्षणेन क्षीणा भवति। राज्यस्य विभिन्नेषु भागेषु त्रयः प्रमुखाः मेघविस्फोटाः अभवन्- रामपुरस्य समेजे, कुल्लू-अन्तर्गतं निरमण्डे, मण्डी-मण्डलस्य थलटूखोड़स्य राजबने च एतासां घटनानां आकस्मिकस्य अप्रत्याशितस्य च कारणात् कुलम् ५३ जनाः लुप्ता अभवन्। अस्य प्रतिक्रियारूपेण बृहत्प्रमाणेन अन्वेषणकार्यक्रमः क्रियते। कुल्लू- जनपदस्य बागीपुले एसडीआरएफ- गृहरक्षक- पुलिस- राजस्वविभागस्य ३८ सदस्यानां समर्पितानि दलानि अहर्निशं कार्यं कुर्वन्तः सन्ति। समेजे एनडीआरएफ, पुलिस, सेना, गृहरक्षकाः, राजस्वविभागस्य च ३०१ सदस्यानां विशालं दलम् अन्वेषणप्रयासेषु सम्मिलितः अस्ति। मण्डीमण्डले विभिन्नविभागेभ्यः ७० सदस्यानां दलं स्थले एव अस्ति, लुप्तजनानाम् अन्वेषणार्थं च यथाशक्ति प्रयत्नः क्रियते। झाकड़ीतः कोलजलबन्धपर्यन्तं सतलुजनद्याः तटे स्थानीयनिवासिभिः सह शताधिकाः जनाः अन्वेषणे भागं गृह्णन्ति। अस्याः दुःखदघटनायाः मध्ये हिमाचलप्रदेशस्य जनानां सरलता, भावना च प्रकाशते। अस्मिन् कठिने काले ते स्वप्रियजनानाम् अन्वेषणाय, परस्परं समर्थनाय च एकीकृताः सन्ति। यथा यथा अन्वेषणं प्रचलति तथा तथा परिस्थितेः वास्तविकता उद्भवति अपि समुदायः आशावान् एव तिष्ठति।

# कर्करोगचिकित्सासुविधानां सुदृढीकरणाय ३०० कोटिरूप्यकाणां अनुमोदनम्- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



**हिमसंस्कृतवार्ताः - शिमला।** सोमवासरे शिमलायां कैंसर- उपशामक- सेवा- कार्यक्रमस्य राज्यपरामर्शदातृमण्डलस्य प्रथमा सभा अभवत्। सभायाः अध्यक्षता मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अकरोत्। मुख्यमन्त्री उक्तवान् यत् अस्माकं सर्वकारेण राज्ये कर्करोगपीडितरोगिणां निःशुल्कम् औषधं, सूच्यौषधं च प्रदातुं तेषां समुचितचिकित्सायाः प्रक्रियां पूर्णतया निःशुल्कं कर्तुं च निर्णयः कृतः। राज्ये कर्करोगचिकित्सासुविधानां सुदृढीकरणाय अपि ३०० कोटिरूप्यकाणां अनुमोदनं कृतम् अस्ति। असौ अकथयत् यत् जनकल्याणं सर्वोच्चप्राथमिकता दत्त्वा हिमाचलजनानाम् उत्तमस्वास्थ्यसुविधाः प्रदातुं वयं प्रतिबद्धाः स्मः। अस्मिन्नवसरे स्वास्थ्य मंत्री डॉ. (कर्नलः) धनीरामशांडिलः अन्ये अधिकारिणः च उपस्थिता आसन्।

# ।। श्रीरामायणकथा।।



## उत्तरकाण्डम्!

### (द्वात्रिंशः सर्गः) वानराणां राक्षसानां च स्व स्व राज्यं प्रति गमनम्। (द्वितीयः खण्डः)

ततः एकदा श्रीरामः ऋक्षवानरराक्षसानां पुरतः वानरराजं सुग्रीवम् अब्रवीत् हे सौम्य! सुरासुरैः दुराधर्षां किष्किन्धां गच्छ। तत्र गत्वा सहामात्यैः निहतकण्टः राज्यं पालय। अङ्गदं, महाबलं हनुमन्तं च त्वं परमया प्रीत्या पश्य। एवमेव तव श्वशुरं सुषेणं , बलिनां वरं वीरं तारं, कुमुदं, दुर्धर्षं, नीलं, शतबलिं, द्विविदं, मैन्दं, गजं, गवाक्षं, गवयं, शरभम्, ऋक्षराजं दुर्धर्षं जाम्बवन्तं, गन्धमादनम् ऋक्षभं,केसरिणं, शरभं, शम्भुं,शङ्कचुडं च प्रीत्या पश्य। अपिच ये मदर्थे त्यक्तजीविताः तान् सर्वानपि त्वं प्रीत्या पश्य।

एवमुक्त्वा श्रीरामः सुग्रीवं पुनः पुनः श्लिष्ट्वा राक्षसराजं विभीषणं मधुरं वाक्यम् अब्रवीत् हे राजन्! त्वं राक्षसानां पुरवासिनां भ्रातुः वैश्रवणस्य ममापि च अत्यन्तं प्रियः। विशेषतः त्वं धर्मज्ञः, अतः धर्मेण हि त्वं लङ्कां शाधि। कथञ्चिदपि त्वम् अधर्मे मतिं मा कार्षीः। हे धर्मज्ञ! बुद्धिमन्तः राजानः ध्रुवं मेदिनीं भुञ्जते।

हे राजन्! ससुग्रीवः अहं नित्यशः त्वया स्मर्तव्यः। इदानीं त्वं विगतज्वरः लङ्कां गच्छ। रामस्य भाषितं श्रुत्वा ऋक्षवानरराक्षसाः साधु साध्विति वदन्तः काकुत्स्थं प्रशंसन्ति स्म, हे महाबाहो! तव बुद्धिः, मधुरं वचनं, स्वयम्भोः इव तव अद्भुतं वीर्यम्। ततः हनुमान् प्रणतः भूत्वा राघवं वाक्यम् अब्रवीत् हे प्रभो! मम परमः स्नेहः नित्यदा त्वयि तिष्ठतु। मम भक्तिश्च नियता भवतु, मम भावः च कदापि अन्यत्र न गच्छतु। हे वीर! यावद् महीतले रामकथा चरिष्यति तावद् मम शरीरे प्राणाः वत्स्यन्ति इत्यत्र संशयः नास्ति। हे प्रभो! तव एतच्चर्यामृतं श्रुत्वा हि अहं तव अदर्शनजनिताम् उत्कण्ठां हरिष्यामि। एवं ब्रुवाणं हनुमन्तं श्रुत्वा रामः वरासनाद् उत्थाय स्नेहवाक्यम् अब्रवीत् हे कपिश्रेष्ठ! एतद् एवमेव भविता इत्यत्र नास्ति संशयः। लोके यावद् एषा मामिका कथा चरिष्यति तावत् तव कीर्तिः भविता, त्वं च जीविष्यसि। यावद् लोकाः स्थास्यन्ति तावद् मम कथाः स्थास्यन्ति।

हे कपिश्रेष्ठ! तव एकैकस्य उपकारस्य परिवर्ते अहं प्राणान् दातुं शक्नोमि। तव शेषोपकाराणां कृते वयम् ऋणिनः भवामः। राघवः एवमुक्त्वा स्वकण्ठात् वैदूर्यतरलं चन्द्राभं हारं निष्कास्य हनुमतः कण्ठे अबध्नात्। तेन महता हारेण उरसि निबद्धेन चन्द्रेण हेमशैलेन्द्रः यथा कपिश्रेष्ठः हनुमान् अत्यन्तं राजते स्म। एवं राघवस्य तद् वचनं श्रुत्वा महाबलाः वानराः तदा उत्थाय श्रीरामस्य पादौ शिरसा प्रणम्य निरगच्छन्। वानरराजः सुग्रीवः धर्मात्मा विभीषणः च राघवम् अश्लिष्यताम्। तदा ते सर्वे वाष्पविक्लवाः अभवन्। ते सर्वे तदा दुःखेन सम्मूढाः इव राघवम् अत्यजन्। राघवस्य वियोगात् ते अश्रुप्रतिपूर्णलोचनाः ऋक्षवानरराक्षसाः सर्वे रघुवंशवर्धनं रामं प्रणम्य स्वं स्वं गृहं प्रत्यगच्छन्।



हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com

# नवदिल्ल्यां महिलानां कृते डिजिटल-शक्ति-केन्द्रस्य उद्घाटनं कृतम्- राष्ट्रीय-महिला-आयोगः

**हिमसंस्कृतवार्ताः प्रवीण कुमारः।** ह्यः नवीदिल्लीनगरे महिलानां कृते राष्ट्रिय-महिला-आयोगेन डिजिटलशक्ति-अभियानस्य अन्तर्गतं डिजिटल-शक्ति-केन्द्रस्य उद्घाटनं कृतम् । अस्य केन्द्रस्य उद्देश्यं साइबर-अपराधानां विषये जागरूकतां वर्धयितुं वर्तते । एतत् केन्द्रं विपत्तिनाम् पञ्जीकरणे निराकरणे च तकनीकीसहायतां प्रदास्यति। आयोगेन उक्तं यत् अङ्कीय-अपराधानां वर्धनं दृष्ट्वा एषा उपक्रमः अङ्कीयजगति महिलानां रक्षणाय, सशक्तिकरणाय च साहाय्यं करिष्यति |. एतत् केन्द्रं साइबर अपराधविपत्तिनां समये प्रभावी च निराकरणं सुनिश्चितं करिष्यति।




अङ्कीयशक्तिकेन्द्रस्य उद्घाटनं

राष्ट्रियमहिलाआयोगस्य अध्यक्षा सुश्री रेखाशर्मा इत्यनेन साइबरशान्तिप्रतिष्ठानस्य सहकारेण कृतम् अस्ति। अस्मिन् समये समागमं सम्बोधयन्ती शर्मामहोदया भारते साइबर-अपराधस्य प्रकरणाः वर्धिताः इति अवदत् ।
२०२१ तमे वर्षे देशे साइबर-अपराधसम्बद्धाः ५२ सहस्राणि ९ लक्षं ७४ प्रकरणाः पञ्जीकृताः, ये २०२२ तमे वर्षे ६५ सहस्राणि ८ शतानि ९३ प्रकरणाः पञ्जीकृताः सन्ति।

# हिमाचलप्रदेशस्य सर्वासु शैक्षणिकसंस्थासु भविष्यति संस्कृतसप्ताहाचरणम्- डॉ.मनोजशैलः

हिमाचल-राजकीय-संस्कृत-शिक्षक-परिषद् राज्यस्तरीयां संगोष्ठ्यां निर्णयोऽयं स्वीकृतः, यत् १६ अगस्त दिनांकात् २२ अगस्त पर्यन्तं हिमाचलप्रदेशस्य शैक्षणिकसंस्थासु सोत्साहेन संस्कृतसप्ताहाचरणं भविष्यति।